# पाठ-२९(अ)
# भारतीयसंस्कृतौ संस्काराः

**सारान्शः**

साहित्यं समाजस्य दर्पण: संस्कृतेः वाहनं च भवति । समाजस्य जीवनयापनविधिः, आचाराः,विचाराः चिन्तनं कर्माणि इत्यादिकं सर्वं सम्मिलितरूपेण संस्कृतिः इति कथ्यते । भारतीयसंस्कृतेः स्वरूपं वेदोपनिषत्पुराणादिग्रंथेषु प्राप्यते। भारतीयसंस्कृतिः विश्वस्य प्राचीनतमासु संस्कृतिषु एका, यत्र वैज्ञानिकदृष्टिकोणस्य आध्यात्मिकभावस्य च समन्वयः लभ्यते । अत्र शरीरमतिरिच्य आत्मनः सत्ता विद्यते । शरीरस्य नाशानन्तरं आत्मा अपरं शरीरं गृह्णाति । अर्थात् तस्य पुनर्जन्म भवति । आत्मानम् उन्नतं विधातुं सदाचरणानि क्रियन्ते । सदाचरणाय 'धर्मः' प्रमुखः । धर्मेण अर्थः कामश्च सिद्ध्यतः । धर्मेण मोक्षः अपि प्राप्यते। एवं धर्मार्थकाममोक्षाः चत्वारः पुरुषार्थाः भारतीयसंस्कृतेः मूलविषयाः। तेषु धर्मः श्रेयोरूपः सनातनः भारतीयसमाजे विद्यते ।

भारतीयसमाजे ब्राह्मण-क्षत्रिय-वैश्य-शूद्रेति चत्वारः वर्णाः श्रमविभाजनस्य वैज्ञानिकं प्रारूपं प्रस्तुवन्ति । एवमेव मानवजीवनं ब्रह्मचर्य-गृहस्थ-वानप्रस्थ -सन्यासाश्रमरूपेषु चतुर्षु विभागेषु विभज्य शतवर्षात्मकजीवनस्य कल्पना कृता । इत्थं पुरुषार्थाः आश्रमाः संस्काराश्च सर्वे परस्परं सम्बद्धाः सन्ति । एवं हि मानवः जीवनस्य चतुर्षु भागेषु पुरुषार्थान् साधयति।दोषाणाम् अपाकरणाय भारतीयसमाजे मानवानां संस्काराः क्रियन्ते । संस्कारैः शुद्धीकरणं भवति। शुद्धीकरणात् दुर्गुणानाम् अपाकरणम् भवति । तदनन्तरं मानवः समाजस्य योग्यः नागरिकः भवति । शुद्धयै धार्मिक क्रियाः क्रियन्ते, संस्काराः विधीयन्ते । एतेषां संस्काराणां विवरणं धर्मशास्त्रेषु गृह्यसूत्रेषु च प्राप्यते । एषु संस्कारेषु त्रयः संस्काराः जन्मनः प्राक् भवन्ति । षड्संस्काराः बाल्यावस्थायां क्रियन्ते । पञ्च संस्काराः सन्ति शिक्षासम्बन्धिनः । एकः संस्कारः अस्ति आश्रमसम्बन्धी, एकश्च अन्त्येष्टि-संस्कारः मृत्योरनन्तरं भवति ।

बाल्यावस्थायाः संस्कारेषु जातकर्म-नामकरणसंस्कारानन्तरं जातकस्य प्रसूतिगृहात् निष्क्रमणं भवति । तदा-पर्यन्तं तस्य शरीरे बाह्यवातावरणं सोढुं शक्तिः उत्पद्यते। षष्ठे मासे तस्य अन्नप्राशनं विधीयते येन बालस्य शरीरम् अन्नेन पुष्येत जन्मकाले तस्य शिरसः संस्कारः चूडाकरणसंस्कारनाम्ना भवति । तदुत्तरं श्रवणरोगापनयनार्थं श्रवणशक्तेः वृद्ध्यर्थञ्च कर्णवेधसंस्कारः क्रियते । तदनन्तरं तृतीये पञ्चमे वा वर्षे तस्य विद्यारम्भसंस्कारः विधीयते । शिक्षाग्रहणाय गुरोः आश्रमे तं नीत्वा पिता आचार्याय समर्पयति। तदैव तस्य उपनयनसंस्कारः विधीयते । तत्र तस्मै यज्ञोपवीतं दत्वा दैवीगुणैः संपूर्य विद्याध्ययनाय प्रवृत्तिः विधीयते । गुरोः आश्रमे एव तस्य वेदारम्भोऽपि जायते । तदुत्तरं केशान्तसंस्कारः गुरोः आश्रमे एव विधीयते । अन्ते च युवा सुशिक्षितो भूत्वा ब्रह्मचर्याश्रमं परित्यज्य गृहस्थाश्रमं प्रवेष्टुमुद्यतः भवति। तस्मिन् काले तस्य समावर्तनसंस्कारः भवति । गृहस्थोपयोगिभिः उपदेशैः आचार्यः तं गृहस्थाश्रमे धर्माचरणाय प्रवर्तयति।समाजे गृहस्थधर्मोचितव्यवहाराय विवाहसंस्कारः तस्य च देहान्ते कुटुम्बिभिः अन्त्येष्टि संस्कारः सम्पद्यते ।

## आवश्यकोऽयं ज्ञानम्



**योग्यतां वर्धयत**

भारतीयसंस्कृतिः प्राचीनतमा। तत्र कारणं किम्? कारणमस्ति वेदोपनिषत् पुराणादिग्रन्थेषु विद्यमानः प्राचीनतमः ज्ञानराशिः । तस्मात् ज्ञानराशेः कारणादेव भारतीयसंस्कृतेः श्रेष्ठत्वम् अद्यापि संसारे सर्वेषां मनो हरति । भारतीयानां जीवनं विविधैः संस्कारैः परिष्कृतं भवति । संस्कृतभाषया भारतीयसंस्कृतेः सुसम्बद्धतापि चिरकालीना गौरवमयी च।

संस्काराः अधोलिखितानां जीवनमूल्यानाम् आधाराः सन्ति ।

त्यागः, तपः, परोपकारः, निष्काम कर्म, कर्त्तव्यनिष्ठा, धार्मिक सहिष्णुता, समन्वयभावः, सत्यं शिवं सुन्दरम्, संयमः, अहिंसा, दानम्, संतोष, विश्वबन्धुत्वभावः, राष्ट्रियैकतायाः भावः।

**अधिकाङ्कानाम् अर्जनं कथं भवेत् ।**

- पाठस्य सम्यक् रूपेण अध्ययनं कृत्वा भावम् अवगच्छेत।
- पाठे आगतानां कठिन शब्दानां व्याकरणात्मक स्वरूपं जानीयात् ।
- अधिकाधिक अध्याये संदर्भित विषयाणां अध्ययनं कर्तव्यम्।

**स्व मूल्याङ्कनम् कुरुत**

- अध्यायस्य भावं स्व शब्दैः वर्णयत ।
- अध्याये आगतानां व्याकरण बिन्दुनां अभ्यासं कुरुत ।
- मूल पाठस्य अभ्यासं कुरुत।